# Shri Bala Trailokyavijaya Kavacham

# શ્રીબાલાત્રૈલોક્યવિજયકવચમ્

## Document Information

Text title : Shri Bala Trailokyavijaya Kavacham

File name : bAlAtrailokyavijayakavacham.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાત્રૈલોક્યવિજયકવચમ્

શ્રીભૈરવ ઉવાચ-
અધુના તે પ્રવક્ષ્યામિ કવચં મન્ત્રવિગ્રહમ્ ।
ત્રૈલોક્યવિજયં નામ રહસ્યં દેવદુર્લભમ્ ॥ ૧॥

શ્રીદેવ્યુવાચ-
યા દેવી ત્ર્યક્ષરી બાલા ચિત્કલા શ્રીસરસ્વતી ।
મહાવિદ્યેશ્વરી નિત્યા મહાત્રિપુરસુન્દરી ॥ ૨॥

તસ્યાઃ કવચમીશાન મન્ત્રગર્ભં પરાત્મકમ્ ।
ત્રૈલોક્યવિજયં નામ શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥ ૩॥

શ્રીભૈરવ ઉવાચ-
દેવદેવિ મહાદેવિ બાલાકવચમુત્તમમ્ ।
મન્ત્રગર્ભં પરં તત્ત્વં લક્ષ્મીસંવર્ધનં મહત્ (પરમ્) ॥ ૪॥

સર્વસ્વં મે રહસ્યં તુ ગુહ્યં ત્રિદશગોપિતમ્ ।
પ્રવક્ષ્યામિ તવ સ્નેહાન્નાખ્યેયં યસ્ય કસ્યચિત્ ॥ ૫॥

(યદ્ધૃત્વા કવચં દેવ્યા માતૃકાક્ષરમણ્ડિતમ્ ।
નારાયણોઽપિ દૈત્યેન્દ્રાન્ જઘાન રણમણ્ડલે ॥ ૬॥

ત્ર્યમ્બકઃ કામદેવં ચ બલં શક્રો જઘાન હિ ।
કુમારસ્તારકં દૈત્યમન્ધકં ચન્દ્રશેખરઃ ॥ ૭॥

અવધીદ્રાવણં રામો વાતાપિં કુમ્ભસમ્ભવઃ ।
કવચસ્યાસ્ય દેવેશિ ધારણાત્પઠનાદપિ ॥ ૮॥

સ્રષ્ટા પ્રજાપતિર્બ્રહ્મા વિષ્ણુસ્ત્રૈલોક્યપાલકઃ ।
શિવોઽણિમાદિસિદ્ધીશો મઘવાન્ દેવનાયકઃ ॥ ૯॥

સૂર્યસ્તેજોનિધિર્દેવિ ચન્દ્રસ્તારાધિપઃ સ્થિતઃ ।

વહ્નિર્મહોર્મિનિલયો વરુણોઽપિ દિશાં પતિઃ ॥ ૧૦॥

સમીરો બલવાંલ્લોકે યમો ધર્મનિધિઃ સ્મૃતઃ ।
કુબેરો નિધિનાથોઽસ્તિ નૈરૃતિઃ સર્વરાક્ષસાન્ ॥ ૧૧॥

ઈશ્વરઃ શઙ્કરો રુદ્રો દેવિ રત્નાકરોઽમ્બુધિઃ ।
અસ્ય સ્મરણમાત્રેણ કુલે તસ્ય કુલેશ્વરિ ॥ ૧૨॥

આયુઃ કીર્તિઃ પ્રભા લક્ષ્મીર્વૃદ્ધિર્ભવતિ સન્તતમ્ ।
કવચં સુભગં દેવિ બાલાયાઃ કૌલિકેશ્વરિ ॥) ૧૩॥

ૠષિઃ સ્યાદ્દક્ષિણામૂર્તિઃ પઙ્ક્તિશ્છન્દ ઉદાહૃતઃ ।
બાલા સરસ્વતી દેવિ દેવતા ત્ર્યક્ષરી સ્મૃતા ॥ ૧૪॥

બીજં તુ વાગ્ભવં પ્રોક્તં શક્તિઃ શક્તિરુદાહૃતા ।
કીલકં કામરાજં તુ ફ્ડાશાબન્ધનં તથા ।
ભોગાપવર્ગસિદ્ધ્યર્થં વિનિયોગઃ પ્રકીર્તિતઃ ॥ ૧૫॥

અકુલકુલમયન્તી ચક્રમધ્યે સ્ફુરન્તી
મધુરમધુ પિબન્તી કણ્ટકાન્ ભક્ષયન્તી ।
દુરતિમપહરન્તી સાધકાન્ પોષયન્તી
જયતુ જયતુ બાલા સુન્દરી ક્રીડયન્તી ॥

ઐં બીજં મે શિરઃ પાતુ ક્લીં બીજં ભ્રૂકુટીં મમ ।
સૌઃ ભાલં પાતુ મે બાલા ઐં ક્લીં સૌઃ નયને મમ ॥ ૧॥

અં આં ઇં ઈં શ્રુતી પાતુ બાલા પઞ્ચાક્ષરી મમ ।
ઉં ઊં ૠં ૠં સદા પાતુ મમ નાસાપુટદ્વયમ્ ॥ ૨॥

ૡં ૡૂં એં ઐં પાતુ ગણ્ડૌ ઐં ક્લીં સૌઃ ત્રિપુરામ્બિકા ।
ૐ ઔં અં અઃ મુખં પાતુ સૌઃ ક્લીં ઐં ત્રિપુરેશ્વરી ॥ ૩॥

કં ખં ગં ઘં ઙં કરૌ મે સૌઃ ક્લીં ઐં ભગમાલિની ।
ચં છં જ ઝં ઞં મે પાતુ બાહૂ સૌઃ સર્વસિદ્ધિદા ॥ ૪॥

ટં ઠં ડં ઢ ણં મે પાતુ વક્ષઃ ક્લીં વીરનાયિકા ।
તં થં દં ધં નં મે પાતુ ઐં કુક્ષૌ કુલનાયિકા ॥ ૫॥

પં ફં બં ભં મં મે પાતુ પાર્શ્વૌ પરમસુન્દરી ।
યં રં લં વં પાતુ પૃષ્ઠં સૌઃ ક્લીં ઐં વિશ્વમાતૃકા ॥ ૬॥

શં ષં સં હં પાતુ નાભિં સૌઃ સૌઃ સૌઃ ત્રિગુણાત્મિકા ।
લં ક્ષં કટિં સદા પાતુ ક્લીં ક્લીં ક્લીં માતૃકેશ્વરી ॥ ૭॥

ઐં ઐં ઐં પાતુ લિઙ્ગં મે ભગલિઙ્ગામૃત્શ્વરી ।
ઐં ક્લીં ગુહ્યં સદા પાતુ ભગલિઙ્ગસ્વરૂપિણી ॥ ૮॥

સૌઃ ઐં ઊરૂ સદા પાતુ વેદમાતાઽષ્ટસિદ્ધિદા ।
સૌઃ ઐં જાનુ સદા પાતુ મહામુદ્રાભિમુદ્રિતા ॥ ૯॥

સૌઃ ઐં ક્લીં પાતુ મે જઙ્ઘે બાલા ત્રિભુવનેશ્વરી ।
ઐં ઐં સૌઃ સૌઃ પાતુ ગુલ્ફૌ ત્રૈલોક્યવિજયપ્રદા ॥ ૧૦॥

ઐં ઐં ક્લીં ક્લીં પાતુ પાદૌ બાલા ત્ર્યક્ષરરૂપિણી ।
શિરસઃ પાદપર્યન્તં સર્વાવયવસંયુતમ્ ॥ ૧૧॥

પાયાત્પાદાદિ શીર્ષાન્તં ઐં ક્લીં સૌઃ સકલં વપુઃ ।
બ્રાહ્મી માં પૂર્વતઃ પાતુ વહ્નૌ નારાયણી તથા ॥ ૧૨॥

માહેશ્વરી દક્ષિણેઽવ્યાન્નૈરૃત્યે ચણ્ડિકાઽવતુ ।
પશ્ચિમે પાતુ કૌમારી વાયવ્યે ચાપરાજિતા ॥ ૧૩॥

વારાહી તૂત્તરે પાયાદીશાન્યાં નારસિંહકા ।
પ્રભાતે ભૈરવી પાતુ મધ્યાહ્ને યોગિની ક્રમાત્ ॥ ૧૪॥

સાયં માં વટુકઃ પાયાદર્ધરાત્રે શિવોઽવતુ ।
નિશાન્તે સર્વગા પાતુ સર્વદા ચક્રનાયિકા ॥ ૧૫॥

રણે રાજકુલે દ્યૂતે વિવાદે શત્રુસઙ્કટે ।
સર્વત્ર સર્વતઃ પાતુ ઐં ક્લૌ સૌઃ બીજભૂષિતા ॥ ૧૬॥

ઇતીદં કવચં દિવ્યં બાલાયાઃ સારમુત્તમમ્ ।
મન્ત્રવિદ્યામયં તત્ત્વં માતૃકાક્ષરભૂષિતમ્ ॥ ૧૭॥

બ્રહ્મવિદ્યામયં બ્રહ્મસાધનં મન્ત્રસાધનમ્ ।
યઃ પઠેત્સતતં ભક્ત્યા ધારયેદ્વા મહેશ્વરિ ॥ ૧૮॥

તસ્ય સર્વાર્થસિદ્ધિઃ સ્યાત્ સાધકસ્ય ન સંશયઃ ।
રવૌ ભૂર્જે લિખિત્વેદં અર્ચયેદ્ધારયેત્તતઃ ॥ ૧૯॥

વન્ધ્યાપિ કાકવન્ધ્યાપિ મૃતવત્સાપિ પાર્વતિ ।
લભેત્પુત્રાન્ મહાવીરાન્ માર્કણ્ડેયસમાયુષઃ ॥ ૨૦॥

વિત્તં દરિદ્રો લભતે મતિમાનયશઃસ્ત્રિયઃ ।
ય એતદ્ધારયેદ્ધર્મે સઙ્ગ્રામે સ રિપૂન્ જયેત્ ॥ ૨૧॥

જિત્વા વૈરિકુલં ઘોરં કલ્યાણં ગૃહમાવિશેત્ ।
બાહૌ કણ્ઠે તથા દેવિ ધારયેન્મૂર્ધ્નિ સન્તતમ્ ॥ ૨૨॥

ઇહ લોકે ધનારોગ્યં પરમાયુર્યશઃ શ્રિયમ્ ।
પ્રાપ્ય ભક્ત્યા નરો ભોગાનન્તે યાતિ પરં પદમ્ ॥ ૨૩॥

ઇદં રહસ્યં પરમં સર્વતત્ત્વેષુ હ્યુત્તમમ્ ।
ગુહ્યાદ્ગુહ્યમિમં નિત્યં ગોપનીયં સ્વયોનિવત્ ॥ ૨૪॥

(રુદ્રયામલે)

(૧-૧૬ શ્લોકેષુ પાઠભેદઃ -
અં આં ઇં ઈં શ્રુતી પાતુ બાલા કામેશ્વરી મમ ।
ઉં ઊં ઋં ૠં સદા પાતુ મમ નાસાપુટદ્વયમ્ ॥ ૨॥

લૃં લૄં એં ઐં પાતુ ગણ્ડૌ ઐં ક્લીં સૌઃ ત્રિપુરામ્બિકા ।
ૐ ઔં અં અઃ મુખં પાતુ ક્લીં ઐં સૌઃ ત્રિપુરેશ્વરી ॥ ૩॥

કં ખં ગં ઘં ઙં કરૌ મે સૌઃ ઐં ક્લીં શત્રુમર્દિની ।
ચં છં જં ઝં ઞં પાતુ મે કુક્ષિં ઐં કુલનાયિકા ॥ ૪॥

ટં ઠં ડં ઢં ણં પાતુ મે વક્ષઃ ક્લીં ભગમાલિની ।
તં થં દં ધં નં પાતુ મે બાહૂ સૌઃ જયદાયિની ॥ ૫॥

પં ફં બં ભં મં મે પાતુ પાર્શ્વે પરમસુન્દરી ।
યં રં લં વં પાતુ પૃષ્ઠે ઐં ક્લીં સૌઃ વિશ્વમાતૃકા ॥ ૬॥

શં ષં સં હં પાતુ નાભિં ભગવત્યમૃતેશ્વરી ।
લં ક્ષં કટિં સદા પાતુ ક્લીં ક્લીં ક્લીં માતૃકેશ્વરી ॥ ૭॥

ઐં ઐં ઐં પાતુ મે લિઙ્ગં ભગં મે ભગગર્ભિણી ।
સૌઃ સૌઃ સૌઃ પાતુ મે ઊરૂ વીરમાતાઽષ્ટસિદ્ધિદા ॥ ૮॥

સૌઃ ઐં ક્લીં જાનૂ મે પાતુ મહામુદ્રાભિમુદ્રિતા ।
સૌઃ ક્લીં ઐં પાતુ મે જઙ્ઘે બાલા ત્રિભુવનેશ્વરી ॥ ૯॥

ક્લીં ઐં સૌઃ પાતુ ગુલ્ફૌ મે ત્રૈલોક્યવિજયપ્રદા ।

ઐં ક્લીં સૌઃ પાતુ મે પાદૌ બાલા ત્ર્યક્ષરરૂપણી ॥ ૧૦॥

શીર્ષાદિપાદપર્યન્તં સર્વાવયવસંયુતમ્ ।
પાયાત્પાય્વાદિ શીર્ષાઙ્ગં ઐં ક્લીં સૌઃ સકલં વપુઃ ॥ ૧૧॥

બ્રાહ્મી માં પૂર્વતઃ પાતુ વહ્ની વારાહિકાઽવતુ ।
મહેશ્વરી દક્ષિણે ચ ઇન્દ્રાણી પાતુ નૈરૃતૌ ॥ ૧૨॥

પશ્ચિમે પાતુ કૌમારી વાયવ્યે ચણ્ડિકાઽવતુ ।
વૈષ્ણવી પાતુ કૌબેર્યાં ઈશાન્યાં નારસિંહિકા ॥ ૧૩॥

પ્રભાતે ભૈરવી પાતુ મધ્યાહ્ને યોગિની તથા ।
સાપાહ્ને વટુકા પાતુ અર્ધરાત્રે શિવાઽવતુ ॥ ૧૪॥

નિશાન્તે સર્વગા પાતુ સર્વદા ચક્રનાયિકા ।
રણે નાગકુલે દ્યૂતે વિવાદે શત્રુસઙ્કટે ॥

સર્વત્ર સર્વદા પાતુ ઐં ક્લીં સૌઃ બીજભૂષિતા । ૧૫॥)

ઇતિ શ્રીબાલાત્રૈલોક્યવિજયકવચં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Trailokyavijaya Kavacham*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*